# मेरुतुङ्गकथितः कालिदासवृत्तान्तः

डॉ. राकेशदाशः*

भारतस्य कवितल्लजेषु ललामभूतः कविः कालिदासः। तस्य काव्येषु रसस्फूर्तिः, दार्शनिकचेतना, भावनागाम्भीर्यं च देशकालनैरपेक्ष्येण सहृदयहृदयानि आवर्जयति। बह्वीः शताब्दीः व्याप्य तस्य कृतयः पाठकानां दर्शकानां च मनांसि मोहयन्ति।

कालिदासस्य जन्मकालविषये विद्वांसः विवदन्ते। एवं मन्यते यत्, गुप्तानां शासनकाले कालिदासः व्यराजत। खृष्टीयचतुर्थशताब्द्याम् उत पञ्चमशताब्द्यां भारतेतिहासस्य सुवर्णमययुगे कालिदासः स्वीयप्रतिभया लोकमनांसि अरञ्जयत् इति विचार्यते।

प्रख्यातः भारततत्त्ववेत्ता Albrecht Weber-महोदयः प्रतिपादयति यत्, द्वितीयचन्द्रगुप्तस्य सम्राजः शासनकाले खृष्टीयपञ्चमशताब्द्यां कालिदासः समराजत। अपरः पाश्चात्त्यविद्वान् A. B. Keith-महोदयः लिखति यत्, गुप्तवंशीयशासकाः कालिदासस्य पृष्ठपोषकाः अभूवन् इति। एतेन इदं सिध्यति यत् अयं कविः खृष्टीयपञ्चमशताब्द्यां वा चतुर्थशताब्द्यां वा कस्यचन गुप्तवंशीयशासकस्य राजसभायां विराजते स्म। एवं हि श्रूयते–

धन्वन्तरि-क्षपणका-मरसिंह-शङ्कु-
वेतालभट्ट-घटकर्पर-कालिदासाः।
ख्यातो वराहमिहिरो नृपतेः सभायां
रत्नानि वै वररुचिर्नव विक्रमस्य॥

अस्मिन् पद्ये उच्यते यत्, नृपतेः विक्रमस्य सभायां नव रत्नानि आसन्। ते च– धन्वन्तरिः, क्षपणकः, अमरसिंहः, शङ्कुः, वेतालभट्टः, घटकर्परः, कालिदासः, वराहमिहिरः च। खेदस्य अयं विषयः यत्, कालिदासस्य जीवनचरितं वर्णयितुम् उपयुक्तं वस्तु बहुधा नैव लभ्यते। टीकाकाराः अपि अस्मिन् विषये न किञ्चिद् लिखन्ति। कालिदासः स्वग्रन्थेषु आत्मनः नाम विहाय अन्यत् किम् अपि तथ्यं न उल्लिखति। केचन कथयन्ति यत्, अवन्तिनरेशस्य विक्रमादित्यस्य राजसभायाम् अयं महाकविः आसीत्। कालिदासस्य मेघदूतकाव्ये उज्जयिनीनगर्याः, महाकालस्य, शिप्रानद्याः च विस्तृतवर्णनं दृष्ट्वा इदम् ऊहितुं शक्यते इति विदुषां मतम्। केचन कथयन्ति यत्, कालिदासः काश्मीरे अथवा वङ्गदेशे जन्म प्राप्य अनन्तरम् उज्जयिनीं गतवान् इति। तस्य कृतिषु मङ्गलाचरणेषु शिवस्य स्तुतिः दृश्यते। तेन अयं शैवः आसीत् इति मन्यन्ते विद्वांसः। किन्तु तस्य काव्येषु ब्रह्म-विष्ण्वादिदेवानाम् अपि प्रशंसापरं वर्णनम् उपलभ्यते।

मेरुतुङ्गः स्वीये प्रबन्धचिन्तामणिनामके ग्रन्थे आरम्भे एव लिखति यत्, अवन्तिदेशे राज्ञः विक्रमादित्यस्य प्रियङ्गुमञ्जरी-नाम्नी काचित् कन्या आसीत्। तस्याः अध्यापनाय वररुचिः इति पण्डितवर्यः नियोजितः आसीत्। अतीव बुद्धिमती सा अल्पैः एव दिनैः सर्वाणि शास्त्राणि अधिगतवती। एकद्युः घर्मकाले मध्याह्नसमये आचार्यं मार्गे सञ्चरणेन श्रान्तं दृष्ट्वा

* विभागाध्यक्षः, संस्कृतदर्शनविभागस्य, रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थानस्य, बेलुडमठस्य।



*dīpaśikhā*/v7/2024/Dr. Rakesh Das/pp. 7-9

वातायनोपविष्टा प्रियङ्गुमञ्जरी तं परिजिहासन्ती कानिचन आम्रफलानि तस्मै दर्शयित्वा अपृच्छत्, “किं भवते इमानि फलानि उष्णानि रोचन्ते उत शीतलानि?” तदा आचार्यः अवदत्, “उष्णानि एव फलानि इष्टानि” इति। तदा आचार्येण विस्तृते वस्त्राञ्चले फलानि पातयन्ती ज्ञात्वा एव तिर्यक् पातितवती। तेन फलानि मृत्तिकायां पतितानि। तदा भूमेः फलानि उत्थाप्य आचार्यः मुखमारुतेन धूलिम् अपनयति स्म। तद् दृष्ट्वा राजकन्या तम् उद्दिश्य उपहासेन अवदत्, “किं फलानि तावद् उष्णानि यत् मुखमारुतेन शीतलीकरोति भवान्?” इदं श्रुत्वा कुपितः आचार्यः अभिशापं दत्तवान् यत्, राजकन्यायाः विवाहः केनचित् पशुपालकेन सह भविष्यति इति। इदं श्रुत्वा राजकन्या अपि अवदत् यत्, “विद्यया तव यः परमगुरुः तादृशम् एव अहं परिणेष्यामि इति।” अग्रे कदाचित् विक्रमादित्यस्य आग्रहेण एव वररुचिः राजकन्यायाः परिणयाय विदुषः वरस्य अन्वेषणे निरतः। कदाचित् अरण्यप्रान्ते भ्रमन् स पिपासितः एकं पशुपालकं दृष्ट्वा तं जलं याचितवान्। पशुपालस्य सकाशे जलं न आसीत्। स पण्डितम् अवोचत्, “करवडीं कुरु” इति। पण्डितः एतादृशम् अश्रुतचरं शब्दम् अज्ञात्वा स्थितः। तदा पशुपालकः पण्डितस्य शिरसि हस्तं दत्त्वा तं महिष्याः अधः उपवेश्य करतलद्वययोजनं कारयित्वा तां मुद्राम् एव “करवडी” इति अवदत्। ततः तम् उदरपूरं दुग्धं पायितवान्। इत्थं शिरसि हस्तस्थापनेन, नवशब्दशिक्षणेन पशुपालः तस्य गुरुसदृशः अभवत्। ततः तं पशुपालं षड्भिः मासैः “ॐ नमः शिवाय” इति मन्त्रं कण्ठस्थं कारितवान्। ततः कदाचित् शुभदिने तं सम्यक् शृङ्गारं कृत्वा राजसभां नीतवान्। राज्ञे आशीर्वादसमये अयं षड्भिः मासैः अभ्यस्तम् “ॐ नमः शिवाय” इति मन्त्रम् अपि विस्मृत्य “उशरट” इति अवोचत्। अनेन विचित्रशब्देन विस्मितं राजानं वररुचिः उक्तवान् यत्, अयं शब्दः कस्यचन श्लोकविशेषस्य संक्षिप्तं रूपम्। स श्लोकः इत्थम्–

उमया सहितो रुद्रः शङ्करः शूलपाणिभृत्।
रक्षतु त्वां महीपाल टङ्कारबलगर्वितः॥

एतेन तस्य अज्ञातचरस्य पाण्डित्यगाम्भीर्येण चकितः तेन महिषीपालेन सह एव पुत्र्याः परिणयं कारितवान्। सः अपि नवपरिणीतः सर्वथा मौनम् अवलम्ब्य तिष्ठति स्म। एकस्मिन् दिने राजपुत्री स्वपत्युः पाण्डित्यपरीक्षणाय नवरचितस्य कस्यचन पुस्तकस्य अक्षरशोधनाय प्रदत्तवान्। अयं तु नखच्छेदिन्या सर्वाणि अक्षराणि बिन्दुमात्रारहितानि अकरोत्। एतेन राजपुत्री अवगतवती यत्, अयं मूर्खः इति। ततः प्रभृति एतादृशमूर्खतायाः कृते “जामातृशुद्धिः” इति शब्दबन्धस्य प्रचलनम् अभवत्। ततः कदाचित् एकस्मिन् चित्रे महिषीणां समूहं दृष्ट्वा अयम् अतीव सन्तोषेण विकृतभाषया किञ्चिद् अवदत्। एतेन राजपुत्री निश्चितवती यत्, अयं कश्चन महिषीपालः इति। ततः राजपुत्र्याः आज्ञया सः वनं गत्वा पाण्डित्यसम्पादनाय देव्याः काल्याः उपासनायां निरतः। एतेन राजा भीतः। स चिन्तितवान् यत्, कदाचित् अयं म्रियते चेत् राजपुत्री विधवा भविष्यति। अतः राजा काञ्चन दासीं प्रेषितवान् महिषीपालस्य तपस्याभञ्जनाय। सा दासी देव्याः काल्याः वेशं धृत्वा तस्य सकाशं गत्वा “अहं तव सन्तुष्टा” इति अवदत्। तदा देवी कालिका अपि तस्य पुरतः प्रत्यक्षीभूय तम् अनुगृहीतवती। ततः तस्य महिषीपालस्य कालिदासः इति नाम अभवत्। सः तदा राजपुत्र्याः सकाशं गतवान्। राजपुत्री अपृच्छत्, “अस्ति कश्चिद् वाग्विशेषः?” (कोऽपि नवशब्दः त्वया शिक्षितः न वा इति राजपुत्र्याः अभिप्रायः आसीत्)। एनं

शब्दबन्धम् आदाय सः त्रीणि महाकाव्यानि तथा षट् प्रबन्धान् रचितवान्।

मेरुतुङ्गस्य कथनानुसारं कालिदासस्य नव ग्रन्थाः सन्ति इति ज्ञायते। किन्तु एतावता कालिदासस्य द्वे महाकाव्ये, द्वे खण्डकाव्ये, त्रीणि नाटकानि लभ्यन्ते। केचन कथयन्ति यत्, 'नलोदयं', 'शृङ्गारतिलकं', 'शृङ्गाराष्टकं', 'द्वात्रिंशत्पुत्तलिका', 'श्रुतबोधः' इति काव्यानि अपि कालिदासेन रचितानि इति मतं पण्डितानाम्। एतेषु श्रुतबोधः नाम काव्यं छन्दोलक्षणबोधकं काव्यम्। श्रव्यकाव्ये दृश्यकाव्ये च कालिदासस्य नैपुण्यम् आसीत् इत्यत्र सन्देहलेशः नास्ति। एतेषु नलोदयकाव्यं चतुःसर्गात्मकं यमककाव्यं भवति। श्रुतबोधः छन्दोलक्षणप्रतिपादकं काव्यम्। द्वात्रिंशत्पुत्तलिकाग्रन्थः वेतालपञ्चविंशतिः इव कथाग्रन्थः वर्तते।



*dīpaśikhā*/v7/2024/Dr. Rakesh Das/pp. 7-9